PAPER - 3

# MT

2018 .... .... 1200 Seat No. | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - III**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

**प्रथमः विभागः - गद्यम् ।**

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

लेरसिया सर्वैः सह समभावेन आचरत् यतः ....... ।

(सर्वे तस्य वयस्याः आसन् । / सः अतीव दयालुः आसीत् ।)

II) पूर्णवाक्येन उत्तरत । १

ग्रामप्रवेशात् प्राक् लेरसिया किं कृतवान् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

शरीरस्य उपरि लेरसियामहोदयेन चन्दनमपि लिप्तम् ।

पुरा यदा मिझोजनाः गणान् कृत्वा वसन्तः तदा तेषामेकस्य गणस्य प्रमुख आसीत् लेरसियानामा। अतीव दयालुः स गणप्रमुखः सर्वैः सह समभावेन आचरति स्म । धनवत्तां दारिद्र्यं वागणयित्वा स जनानां सहृदयतया साधुतया वा तेषां माहात्म्यं निश्चिनोति स्म । कदाचित् सः स्वसहकारिभिः सह दूरवर्तिनं कञ्चन ग्रामं गतः । तत्पूर्वं कदापि स तत्र न गतवान् । ग्रामप्रवेशात् प्राक् लेरसिया आत्मानं कशाघातैः व्रणितं कृतवान् । कस्याश्चिदोषधेः अङ्गरसस्य विलेपनमपि स्वशरीरे तेन कृतं यतस्तस्य शरीरमुच्छूनं रूपहीनं रुग्णमिव च दीनं समजायत । तस्योपरि तेन मृत्तिकापि लिप्ता यतः स दीनतरोऽदृश्यत । तदनु स सहकारिभिः सह तद् ग्रामं प्रविश्य मध्यचतुष्पथं यातः । तत्र ते सर्वे मार्गे समुपाविशन् । तत्रस्था ग्रामवासिन एतावदेव जानन्ति यदागता जनाः ख्यातकीर्तेः लेरसियामहोदयस्य जनपदतः वर्तन्ते परं न कोऽपि जानाति स्म तेषु कतमः लेरसिया इति ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) रिक्तस्थानपूर्तिं कुरुत । १

१) यदागताः - ....... । (यत् + आगताः, यत + आगताः, यदा + गताः)

२) दीनतरोऽदृश्यत - ....... । (दीनतरे + अदृश्यत, दीनतरः + अदृश्यत, दीनतरा + अदृश्यत)

II) समूहेतरपदं चिनुत । १

१) विलेपनम्, रूपहीनम्, कुरूपम् । २) प्राक्, पश्चात्, पूर्वम् ।

III) मञ्जूषातः उचितं विशेषणं चित्वा मेलनं कुरुत । १

| विशेषणम् | विशेष्यम् |
|---|---|
| ........... | गणप्रमुखः |
| ........... | ग्रामवासिनः |

(उच्छूनं, दयालुः, ख्यातकीर्तेः, तत्रस्थाः)

IV) गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-अव्यये ....... , ....... । १

३. **स्वमतप्रकटनम् ।**

'लेरसियामहोदयेन स्वस्य रूपान्तरणं किमर्थं कृतं भवेत्' एतद्विषये ३० / ४० शब्दैः माध्यमभाषया लिखत । २

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् ।**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

अपारम्परिकाः उपायाः स्वीकर्तव्याः यतः ....... ।

(ते महत्त्वपूर्णाः / तेन राष्ट्रोन्नतिः स्यात् ।)

II) कः कं वदति ? १

अपि सैव पवनोर्जा ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

ट्रॉम्बेतारापुरस्थौ द्वौ जलविद्युत्प्रकल्पौ प्रसिद्धौ ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः, पवनः, जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । गोमयात्, पर्णावशेषाद्, अवकराच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते। अणुभ्योऽपि ऊर्जा लभ्यते ।

श्रेया - तथापि एतेषु सौरं स्रोतः अपरिमितम् अक्षयं, प्रदूषणमुक्तं च । 'कोराडी' इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारापुरापुरस्थौ द्वौ अणुविद्युत्प्रकल्पौ प्रसिद्धौ । कोयना-जल-विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव ।

पार्थः - कुत्रचित् पर्वतेषु पवनचक्रिकाः स्थाप्यन्ते । मरुतः साहाय्येन विद्युन्निर्मीयते । अपि सैव पवनोर्जा ?

श्रेया - सत्यम्, सा पवनोर्जा प्रदूषणमुक्ता, सुरक्षिता, उपजीविकासाधिका च ।

अथर्वः - एवमपारम्परिकान् उपायान् स्वीकृत्य पारम्परिकस्रोतसां परिरक्षणं च कर्तव्यं सर्वैः । येन धनसञ्चयो भवेत्, तैनेव राष्ट्रोन्नतिः स्यात् ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

भाग्यरेषैव = ....... + ....... ।

II) विलोमशब्दौ लिखत । १

१) प्राचीना × ....... । २) घातका ×....... ।

III) गद्यांशे आगते विशेषणे लिखत । १

सौरस्रोतः - ....... , ....... ।

IV) गद्यांशे आगते द्वे धातुसाधित-अव्यये लिखत । १

३. **पृथक्करणम् ।** २

i) धनसञ्चयः भवेत् ।

ii) पारम्परिकस्रोतसां परिरक्षणं कर्तव्यम् ।

iii) राष्ट्रोन्नतिः स्यात् ।

iv) अपारम्परिकाः उपायाः स्वीकर्तव्याः ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) भगवान् सुगत एव ....... पिता । ( भिक्षुणां / जनानां )

२) ....... समाश्रितं खल्वेतत्तपोवनम् । (सत्त्वभरैः / ऋषिभिः)

II) पूर्णवाक्येन उत्तरं लिखत । १

तपोवनं केषां निवासस्थानम् आसीत् ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

भगवान् स्वयं भिक्षुं प्रति गच्छति स्म ।

अवन्तीनगराद् बहिरासीद् विशालं रमणीयं तपोवनम् । पत्रपुष्पफलच्छायायुतैः वृक्षैः विराजमानं, विविधपशुपक्षिभिः समाश्रितं, तपोधनानां निवासस्थानं खल्वेतत्तपोवनम् । तत्रासीदेकः विख्यातः बौद्धविहारः । भगवतः सुगतस्य बहवोऽनुयायिनः तत्रोषित्वा तथागतस्योपदेशमनुसरन्तः भिक्षुव्रतानां पालनं कुर्वन्ति स्म । भगवान् सुगत एवास्माकं पिता इत्येवं मन्यन्ते स्म ते भिक्षवः । अतः विविधसमस्यानां निराकरणार्थं ते स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म । एकदा कोऽपि भिक्षुःभगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत्। भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) चतुर्थपदं लिखत । १

कोऽपि - कः + अपि :: सोऽतिष्ठत् - ....... + ....... ।

II) गद्यांशात् चित्वा पर्यायशब्दौ लिखत । १

१) मनोहरम् - ....... । २) भिक्षुकः - ....... ।

III) रिक्तस्थानपूर्तिं कुरुत । १

यथा - चीवराणि जीर्णानि ।

तथा - ....... जीर्णे ।

....... जीर्णम् ।

IV) गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-अव्यये चित्वा लिखत । १

३. **पृथक्करणम् । वृक्षरेखाचित्रं पूरयत ।** २




**द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

वैज्ञानिकैः केषु विषयेषु प्रावीण्यं प्राप्तं तद् पद्यांशात् चित्वा जालरेखाचित्रं पूरयत ।



अणुशास्त्रे वा विज्ञाने वा
सङ्गणकीये पोखरणे वा
ऐन्द्रजालिकैराधुनिकैर्यत् प्रावीण्यं प्राप्तम्
ध्वजमध्ये तद् यशो धवलतामाप्त्वा सङ्कलितम् ।
ध्वजमध्यस्थो धवलिमा च मामुत्साहयतेऽयम्
भावोत्कटता मुखरयते मां 'जयतु च विज्ञानम्' ॥

२. **तात्पर्यलेखनम् ।** २

'जयतु विज्ञानम्' एतस्य स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) विलोमशब्दौ लिखत । १

i) सह × ....... । ii) कदाचित् × ....... ।

I) चतुर्थपदं लिखत । १

i) चन्द्रमाः : शशी :: जीवनम् : ....... ।

ii) शोभते : भाति :: नेत्रम् : ....... ।

यथा छायातपौ नित्यं सुसम्बद्धौ परस्परम् ।
एवं कर्म च कर्ता च संश्लिष्टावितरेतरम् ॥१॥
अङ्गेन गात्रं नयनेन वक्त्रं न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितञ्च चन्द्रं विना भाति तथा न रात्रिः ॥२॥

२. **अन्वयपूर्तिः ।** २

यथा ....... नित्यं ....... सुसम्बद्धौ (स्तः) । एवं (तथा) कर्म च ....... च इतरेतरं ....... (स्तः)।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) गजाननं ....... ०पङ्कजम् ॥
ii) यो ....... निवर्तते ॥
iii) समुपागतवति ....... महामान्यः ॥

**ड) वृत्तनाम चिनुत ।** १

ज्ञानेन पुंसां सकलार्थसिद्धिर्ज्ञानादृते काचन नार्थसिद्धिः ।
ज्ञानस्य मत्वेति गुणान् कदाचिज्ज्ञानं न मुञ्चन्ति महानुभावाः ॥

अस्य श्लोकस्य वृत्तनाम ....... इति ॥ (उपेन्द्रवज्रा / इन्द्रवज्रा / गीतिः)

## तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् ।**

I) एकपदेन उत्तरं लिखत । १

कः चित्रकलायाः श्रेष्ठत्वम् उक्तवान् ?

II) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

धर्मकामार्थमोक्षदं चित्रं कलानां प्रवरम् अस्ति ।

> 'विष्णुधर्मोत्तरपुराणम्' इति अस्मिन् ग्रन्थे चित्रकलाशास्त्रं विस्तरेण वर्णितं विद्यते । 'मार्कण्डेय-वज्रसंवादः' तत्र प्रख्यातः । वज्रमहाराजेन, ''लोके-परलोके सुखसाधनं किम् इति' पृष्टे सति मार्कण्डेयमुनिः चित्रकलायाः श्रेष्ठत्वम् इत्थं उक्तवान्-
>
> यथा सुमेरुः प्रवरो नगानां
> यथाण्डजानां गरुडः प्रधानः ।
> यथा नराणां प्रवरः क्षितीशः
> तथा कलानामिह चित्रकल्पः ॥
>
> कलया न केवलं कलावताम् अपि तु सामान्यजनानाम् अपि सुखप्राप्तिः भवति ।
>
> कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम् ।
> माङ्गल्यं प्रथमं चैतद् गृहे यत्र प्रतिष्ठितम् ॥
>
> अस्याः चित्रकलायाः प्रवर्तकः आसीद् धर्मसुतः नारायणः यः देवानां शिल्पी ।

**२. पृथक्करणम् ।** कः केषां प्रवरः तद् लिखित्वा जालचित्रं पूरयत । २




## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः । (मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।)** ५

प्रभञ्जनो नाम झञ्झावातः आत्मनः अनुजं मन्दपवनम् अपृच्छत् मत्सदृशः शक्तिमान् भवितुं नेच्छसि किम् । तस्य सा ....... अनुत्तरिता एवावर्तत । तदा स्वमाहात्म्यं पुनः एकवारं कथयितुं प्रभञ्जनः प्राह मन्दपवनं, वत्स पश्य, यदाहं वहामि तदा मम आगमनं सुदूरं सूच्यते। ....... वार्ता प्रसरति । ....... जनाः इतस्ततो धावन्ति । पशुपक्षिणः अपि संत्रस्ता जायन्ते । सागरः अपि ....... भवति । पर्वतप्रायाः तरङ्गाः तस्मिन् उद्भवन्ति । एतत्सर्वं श्रुत्वा किं न कामयसे मत्सदृशः ....... ।

( सर्वत्र, भवितुम्, प्रक्षुब्धः, पृच्छा, भयभीताः )

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) दीपोत्सवः । ii) सङ्गणकः । iii) उद्यानम् ।

**क) संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) An elephant walks very slowly.

ii) Laziness is the greatest enemy of a man.

iii) The trees grow on the mountain.

iv) The main job of the news reporter is to collect the news.

v) I go to library.

vi) River water is clean.

vii) Lion is the king of beasts.

viii) The kids dance happily.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) गम् (१ प.प.) २) कथ् (१० उ.प.)

३) सम् + ऋ (१ प.प.) ४) याच् (१ आ.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) रामे पुरतः हनुमान् उपविशति । २) पृथिव्याः परितः वातावरणम् अस्ति ।

३) सरस्वतीं नमः । ४) स्वस्ति बालकानाम् ।

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | वर्तमानकालः | प्रथमः भूतकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| श्रु ५ प.प. | .......... | शुश्राव | .......... | ........ | ........ | श्रुणुयात् |
| भू १ प.प. | भविष्यति | .......... | ........ | ........ | ........ | भवेत् |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| द्वितीया | भगवन्तम् | ...... | ...... |
| चतुर्थी | ...... | नामभ्याम् | ...... |
| षष्ठी | एतस्य | ...... | ...... |
| सम्बोधन | ...... | ...... | सर्वे |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(कृतवान्, कर्तव्यम्, प्राप्तः, मोदमानः, रक्षणीयाः, कथितम्, स्मरन्, समुपागतवति)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | **समस्तपदम्** | **समासनामानि** |
|---|---|---|
| i) | व्यक्तं च अव्यक्तं च एतयोः समाहारः । | कर्मधारय समास |
| ii) | न इच्छा । | षष्ठी तत्पुरुष समास |
| iii) | महान् आश्रयः । | तृतीया तत्पुरुष समास |
| iv) | चमसः इव चञ्चूः यस्य सः । | नञ् तत्पुरुष समास |
| v) | मधु पिबति इति । | अव्ययीभाव समास |
| vi) | दिने दिने । | समाहार द्वन्द्व समास |
| vii) | अश्रुभिः पूर्णे । | उपपद तत्पुरुष समास |
| viii) | रसस्य निर्मितिः । | बहुव्रीहि समास |

**ढ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) तेन धनिकेन सत्वरं सेवकः प्रेषितः । (प्रयोगपरिवर्तनं कुरुत ।)

ii) दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव । ('यदा-तदा' उपयुज्य वाक्यं पुनर्लिखत ।)

iii) दशाननः स्वर्गं गच्छति । ('श्रीरामचन्द्रः' उपयुज्य प्रयोजकरचनां कुरुत ।)

iv) भवती नाट्यशास्त्रं जानाति । ('भवती' स्थाने 'त्वम्' उपयुज्य वाक्यं पुनर्लिखत ।)

**ण) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) संवत्सरे ............ अयने स्तः । (2)

ii) बिल्वदले ................. पत्राणि सन्ति । (3)

iii) मम मातामही दिनस्य .............. औषधं सेवते । (twice)

iv) श्रावणः इति ............... मासः । ($5^{th}$)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

कारवेल्ल - परवलादयः शाकलताः आधारीभूतजालेभ्यः अवलम्बन्ते । सरलाः परवलाः विक्रयणयोग्याः भवन्ति । अत एव यदा परवलाः लघु भवन्ति तदा तेषाम् एकस्मिन् अन्ते पाषाणः बध्यते । तस्य भारेण परवलाः वक्राः न भवन्ति । अस्माकं पुरतः वर्तमानं लक्ष्यं तस्य पाषाणस्य कार्यं करोति । अयोग्यविषयान् प्रति शीघ्रम् आकृष्यमाणम् भूयमानम् अस्माकं मनः लक्ष्यस्य भारेण सर्वदा समुचितमार्गे स्थापयितुं शक्यते ।

**ब) संस्कृतपद्यांशौ पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

अनाहूतः प्रविशति अपृष्टो बहुभाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ।।१।।
अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
सकलरसायनसारो दोषेणैकेन लशुन इव ।।२।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

(अनन्यमानसं विचिन्तयन्तं निजसुपुत्रमवधार्य महिषी चन्द्रमतिः पृच्छति।)

चन्द्रमतिः – वत्स चिरं जीव। केन कारणेन म्लानमुखः सचिन्तः दृश्यसे?

यशोधरः – (स्वागतम्) कथमिदानीं हृदशल्यं निवेदयामि। निवेदयेयम्। भवतु (प्रकाशम्) अम्ब प्राप्तायामुषसि स्वप्नमेकमपश्यम्।

चन्द्रमतिः – तेन हि सत्वरं कथय।

यशोधरः – श्रुणोतु कश्चन निशाचरः मम वक्षोदेशे निषण्णः। स आह राज्यभारं पुत्रे निधाय यतिर्भूत्वा तपोवनमाश्रय इति।

**Best of Luck**